

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

November 2025

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 08
November 2025, Price Rs.20/-
No. of pages-24

## तिरुचानूरुपद्मावतीमातुः पञ्चमीतीर्थम्

(25.11.2025)





2025 सेप्टम्बर् 24 तिथौ तिरुमल सालकट्ल ब्रह्मोत्सव पेद्दशेषवाहने भागीकृतत्वेन उपस्थित भारत राष्ट्रपतयः गौ।। श्री पि.राधा कृष्णन् महोदयाः। आन्ध्रप्रदेश मान्य श्रीनाराचन्द्रबाबुनायुडु महोदयाः।



2025 सेप्टम्बर् 25 तिथौ तिरुमल श्रीपतिदर्शनानन्तरं भारतोपराष्ट्रपति गौरवनीय श्री सि.पि. राधाकृष्णन् महोदयेभ्यः श्रीवेङ्कटेश्वरस्वामिनां चित्रपटं समर्पयन्तः आन्ध्रप्रदेश मुख्यमन्त्रिवर्याः मान्यश्री नाराचन्द्रबाबुनायुडु महोदयाः। ति.ति.देवस्थान धर्मकर्तृमण्डल्यध्यक्षाः श्री बि.आर्.नायुडु महोदयाः, ति.ति.देवस्थान कार्यनिर्वहणाधिकारिणः श्री अरविन्दकुमार् सिंघाल् ऐ.ए.यस्., महोदयाः।





2025 सेप्टम्बर् 24 तिथौ तिरुमल श्रीवारि ब्रह्मोत्सवसन्दर्भे स्वामिने आन्ध्रप्रदेश राष्ट्रप्रभुत्व पक्षतः पीताम्बरणि समर्पयन्तः मुख्यमन्त्रिवर्याः मान्यश्री नाराचन्द्रबाबुनायुडु महाशयाः। अस्मिन् सन्दर्भे श्रीवारिप्रसादान् चित्रपटश्च समर्पयन्तः तिरुमलतिरुपतिदेवस्थान धर्मकर्तृमण्डल्यध्यक्षाः बि.आर्.नायुडु महोदयाः तिरुमल तिरुपति देवस्थान कार्यनिर्वहणाधिकारिणः श्री अनिल् कुमार् सिंघाल् ऐ.ए.एस्., महोदयाः पश्चात् मुख्यमन्त्रिवर्याः तिरुमलतिरुपतिदेवस्थानस्य 2026 वार्षिकक्यालण्डरु, डैरीश्च आविष्कुर्वदृश्यणि।



# गीतामृतम्

श्रीभगवानुवाच -

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति।

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसोह्याशु बुद्धिर्पर्यवतिष्ठते।।

(भगवद्गीता २.६४,६५)

६४. भावः - उक्तेन प्रकारेण मयि सर्वेश्वरे चेतसः शुभाश्रयभूते न्यस्तमनाः निर्दग्धाशेषकल्मषतया रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान् चरन्) तिरस्कृत्य वर्तमानः विधेयात्मा विधेयमनाः प्रसादमधिगच्छति। निर्मलान्तःकरणः भवतीत्यर्थः।

विशेषांशः - ब्रह्मनिष्ठः देहसंरक्षणार्थं अन्नपानादिभिः स्वात्मप्रसन्नतायै चित्तशान्तये भङ्गमकारयन् वर्तते। अर्थात् देहसंरक्षणात् ज्ञानावरणं न भवति। जीवनार्थमन्नभोक्ता मुक्तः एव। खादनार्थमेव यः जीवति सः बद्धः एव।

६५. भावः - अस्य पुरुषस्य मनः प्रसादे सति प्रकृतिसंसर्गप्रयुक्तसर्वदुःखानां हानिरुपजायते। प्रसन्नचेतसः आत्मावलोकनविरोधिदोषरहितमनसः तदानीमेव हि विविक्तात्मविषया बुद्धिः मयि पर्यवतिष्ठते। अतः मनः प्रसादे सर्वदुःखानां हानिर्भवत्येव।

विशेषांशः - निर्मलोदकपात्रे सूर्यप्रतिबिम्बः यथा स्पष्टं दृश्यते तथा विशुद्धान्तःकरणस्य ध्येयात्मसाक्षात्कारः त्वरयैव भवति।

# सङ्कीर्तनम्



किं करिष्यामि किं करोमि बहुल -
शङ्कासमाधानजाड्यं वहामि (किंकरिष्यामि)
नारायणं जगन्नाथं त्रिलोकैक
पारायणं भक्तपावनं
दूरीकरोम्यहं दुरितदूरेण सं
सारसागरमग्नभञ्जलत्वेन (किंकरिष्यामि)
तिरुवेङ्कटाचलाधीशं कविराज
वरदं शरणागतवत्सलं
परमपुरुषं कृपाभरणं भजामि
मरणभवदेहाभिमानं वहामि (किंकरिष्यामि)

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३४)

न हि सत्यात् परो धर्मः।

सम्पादकीयम्

# हे जगन्मातः! वन्दनं, ते

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षःस्थल नित्यवासरसिकां तच्छान्तिसंवर्धनीं।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम्।।

जगदिदमैश्वर्यमयम्। लक्ष्मीसम्पद्भिः विराजमानदिव्यत्वं लक्ष्मीदेवताकृतित्वेन महर्षिभिः दृष्टम्। जगत्कारणस्य ईश्वरशक्तिरेव लक्ष्मीः। अर्थात् न केवलं धनरूपिणी शुद्धसत्त्वरूपिणी च लक्ष्मीः शुभङ्करगुणानां साकारेयम्। मातरमिमां पद्मेतिव्यवहरामः। विकसल्लक्षणमेव पद्मम्। विकासः ज्ञानस्य ऐश्वर्यस्य च प्रतीका। विष्णुहृदये पद्मलक्ष्मीर्वसतीति शास्त्रवचनम्। अर्थात् महाविष्णुसङ्कल्पशक्तिरेव ऐश्वर्यत्वेन व्याप्तम्।

मातृणां मातुः श्रीपद्मावतीदेव्याः ब्रह्मोत्सवाः कार्तिकमासे सम्प्रदायमनुसृत्य निर्वाह्यन्ते। प्रयशः अस्मात्पुराणेषु द्वादशमासानां विशिष्टमहत्वं वर्णितम्। उपपुराणेषु कार्तिकमाघमासादयः बहुमहत्त्वं पद्योतयन्ति। कार्तिकमासे मातुः ब्रह्मोत्सवाः जगज्जेगीयमानत्वेन प्रवर्तन्ते। मातुः निर्वाह्यमानविविधसेवासु गजवाहनं मुख्यम्। गजः स्थिरत्वस्य, आध्यात्मिकबलस्य च सङ्केतः। मातुः गजवाहनपरिभ्रमण द्वारा भक्तेभ्यः अचश्चलभक्तिः धैर्यं च लभ्यते।

कार्तिकशुद्धपश्चमी जगन्मातुः अलमेलमङ्गम्बायाः जन्मदिनम्। अर्थात् मातुः भूलोकावतरणदिनम्। तस्मिन्दिने तिरुमल श्रीवेङ्कटेश्वरात् जन्मदिनबहुमतित्वेन पीताम्बरश्रेष्ठनारीवस्त्राणि चन्दनकुङ्कुमतुलसीप्रसादाः साम्प्रदायिक बहुमतित्वेन (सारे) समर्प्यन्ते। तस्मिन्नेव दिने मातुः ब्रह्मोत्सवेषु प्रधानघट्टः पश्चमीतीर्थमेव। इदं पद्मसरोवरे प्रवर्तमानः विशेषकार्यक्रमः। सरोवरतीरे मातुः चक्रत्ताल्वारोः तिरुमज्जनं निर्वाह्यते। पद्मपुष्करिण्यां भगवतः सुदर्शनस्य चक्रस्नानं अर्चकैः निर्वाह्यते। इयं मातुः ब्रह्मोत्सवकलाशोभेव भाव्यते। लक्षशः भक्ताः एतद्दर्शनं प्राप्य तीर्थस्नानं कृत्वा मातुः कृपापात्राः भवन्ति।

कार्तिकमासः हरिहरादीनां प्रीतिकरः। अत्र हरस्य तिरुपति कपिलेश्वरालये स्वामिसन्निधौ निर्वाह्यमानः अन्नाभिषेकः विशिष्टः। एतद्दर्शनादेव भक्ताः तार्यन्ते। एवं कपिलेश्वराय निर्वाह्यमान लक्षबिल्वार्चनं अतीव नयनानन्दकरम्। शिवपुत्राय कुमारस्वामिने निर्वाह्यमानस्कन्दषष्ट्युत्सवः दर्शनादेव अतीव पुण्यप्रदः।

तिरुमल श्रीपतिसन्निधौ निर्वाह्यमान कैशिकद्वादशी अत्यन्त विशिष्टः। अस्मिन् सन्दर्भे श्रीपत्युत्सवमूर्तिषु एकं उग्रश्रीनिवासमूर्तिं सूर्योदयात् पूर्वमेव तिरुमलमाडवीथीषु भ्रामयित्वा पुनः स्वामिसन्निधौ निवेशनं विशिष्टकार्यक्रमः। श्रीवेङ्कटेश्वरसन्निधौ कार्तिकपौर्णम्यां प्रवर्तमानदीपोत्सवः ज्वालातोरणम् मुक्तिप्रदम्। अस्मिन्मासे तिरुपति तिरुमलदेवस्थानालयेषु नारायणवणस्थ श्रीकल्याणवेङ्कटेश्वरालये प्रवर्तमानः तेप्पोत्सवः (नावोत्सवः) नगिरि श्रीकरियमाणिक्यस्वामिपवित्रोत्सवः, नागलापुरवेदनारायणस्वामि प्रवित्रोत्सवः श्रीपद्मावती देव्यै निर्वाह्यमान पुष्पयागमहोत्सवः अत्यन्तं परिगणनीयाः। ऐतेषु उत्सवेषु भागस्वामिनः भूत्वा वयं -

श्रीनिवासकृपपात्राः भवेम।

ओं नमो वेङ्कटेशाय।

# नवम्बर् - २०२५

सम्पुटिः-१२ सञ्चिका-०८

स्वस्तिश्री चान्द्रमानश्रीविश्वावसुनामसंवत्सर कार्तिकशुद्धैकादशीशनिवारादारभ्य - मार्गशिरशुद्धदशमी - आदिवारपर्यन्तम् - २०२५



पद्मावतीं भगवतीं वन्दे जगन्मातरम् 06
- कुमारी लिङ्गरेड्डि उमामहेश्वरी

तुलसीमाहात्म्यम् 08
- डा पि.माधवी

धन्वन्तरिजयन्ती 09
- डा के.कोटेश्वरय्य

यज्ञवाल्क्यजयन्ती 15
- डा जि.चन्द्रशेखर्

वेदान्तदेशिकः 16
- आचार्य जि.पद्मनाभम्

सुब्रह्मण्यषष्ठी 18
- डा यन्.गुणवती

सुवर्णवर्षः (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः


मुखचित्रम् - श्री पद्मावतीदेवी - तिरुचानूरु।

अन्तिमपुटचित्रम्:- श्री पद्मावतीदेव्यापुष्पयागः, तिरुचानूरु।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -

chiefeditortpt@gmail.com



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-


*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका





गौरवसम्पादकः:-
श्री अनिल् कुमार सिङ्घाल् I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा।। वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयकेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः,
ति.ति.दे.






सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— प्रधानसम्पादकः

**मातर्नमापि कमले! कमलायताक्षि।**
**श्रीविष्णुहृता कमलवासिनि! विश्वमातः।।**

परमात्मनः पुरुषोत्तमस्य श्रीमहाविष्णोः दिव्यमहिष्याः नामानि नैकानि विद्यन्ते। तानि तावत् लक्ष्मी, पद्मालया, पद्मा, कमला, श्रीहरिप्रिया, इन्दिरा, लोकमाता, रमा, भार्गवी, लोकजननी, क्षीरसागरकन्यका इति। इयमेव पद्मावती नाम्ना प्रसिद्धिं गता अस्मिन् कलौ युगे।

भृगुमहर्षेः ताडनात् श्रीमहाविष्णुस्थानं वैकुण्ठं परित्यज्य कोल्हापुरिक्षेत्रे महालक्ष्मीनाम्ना प्रसिद्धिं प्राप्य श्रीनिवासं तोषयितुं रञ्जयितुं शुकपुरिक्षेत्रे (तिरुचानूरुक्षेत्रे) विराजमाने परमपवित्रेऽस्मिन् पद्मसरसि

**पञ्चम्यां शुक्रवारे च मुहूर्ते मन्त्रसंज्ञके।**
**ववुः पुण्याः सुखा वाता उत्तराषाढतारके।।**
**ततः पद्मसरोमध्ये तेजोराशिर्महानभूत्।**

**- श्रीवेङ्कटाचलमाहात्म्यम् (पद्मपुराणम्)**

इत्युक्तरीत्या सहस्रदलहिरण्मयपद्मात् शुभेऽस्मिन् मुहूर्ते आविर्भूय श्रीनिवासं सानन्दं सहर्षं समालिङ्ग्य कल्हारमालां कण्ठे समर्प्य तं सुसम्पन्नं अकरोत् इति प्रसिद्धा एका कथा वर्तते।

तिरुचानूरुक्षेत्रे विराजमानस्य दिव्यमन्दिरस्य अधिष्ठात्री इयं पद्मावती। अस्याः देव्याः दिव्यमन्दिरे कृष्णस्वामिनः आलयः महामण्टपः स्नपनमण्टपः अन्तरालयः गर्भालयः सुन्दरराजस्वामी प्रदक्षिणमण्टपाश्च विराजन्ते। अयं चालयः अत्यन्तं प्राचीनः शासनाधाररीत्या ८०० संवत्सरेभ्यः पूर्वं निर्मितः अभूदिति चारित्रिकाः वदन्ति।

स्वर्णखचितशिखरत्रितलशान्तिकविमानान्तर्गत दिव्यधाम्नी पद्मावती राराजते। इयं तावत् तिरुमलक्षेत्रे आनन्दनिलये विराजमानस्य श्रीश्रीनिवासस्य वक्षःस्थले व्यूहलक्ष्मीनाम्ना तिरुचानूरु क्षेत्रे पद्मावती नाम्ना प्रसिद्धा भवति। इयं तावत् अचिन्त्यदिव्याद्भुतनित्ययौवन सम्पन्ना। स्वभावलावण्यातिशया शङ्खचक्रपद्मसहिता अभयवरदहस्ता पुष्पमालाधरा दिव्याभरणभूषिता कौशेयवस्त्रा मन्दस्मिता कर्णनासिकाभरणभूषिता पद्मासने संस्थिता तोरणसहिता मुग्धमनोहररूपा च भवतीति अस्याः पद्मावतीदेव्याः दिव्यदर्शनेन वयं सर्वे धन्याः पुनीताः पावनाः पवित्रतमाः भवामः इति वक्तुं मे चेतः आनन्दमनुभवति।

**उत्सवाः -** पद्मावतीदेव्याः नित्योत्सवाः नक्षत्रोत्सवाः संवत्सरोत्सवाः वसन्तोत्सवाः प्लवोत्सवाः पवित्रोत्सवाः ब्रह्मोत्सवाश्च सर्वजनान्दप्रदायकतया अत्यन्तवैभवेन दिव्यपाञ्चरात्रागमशास्त्रपद्धत्या बहुकालत् प्रभृति वंशपारम्पर्येण अनुष्ठीयन्ते इति नैव संशीतिलेशः।

एतेषु उत्सवेषु विशिष्टतया विलक्षणतया वैदिक्या पद्धत्या प्रतिवर्षं निर्दिष्टे मासे अनुष्ठितस्य ब्रह्मोत्सवस्य वैशिष्ट्यं यथाशक्ति परिशीलयामः।

कुमारी लिङ्गरेड्डि उमामहेश्वरी
चरवाणी -
९१८२०७५७६१

## पद्मावतीं भगवतीं वन्दे जगन्मातरम्



**ब्रह्मोत्सवस्वरूपम् - उत् नाम उत्कृष्टः सवः नाम यज्ञः। उत्कृष्टः यज्ञविशेषः उत्सवः। इति।**

अस्य वैभवेन अनुष्ठीयमानत्वत् ब्रह्मोत्सव इति नामसार्थक्यमभूत्।

पौराणिककथामनुसृत्य वृश्चिके मासे शुक्लपक्षे पद्मावती आविर्भूता। तस्मिन्नेव दिने आविर्भावदिवसः इति निश्चित्य पञ्चमीतीर्थं पद्मसरसि अवभृथं चक्रस्नानं चाति वैदिकक्रियाः सम्यगाचरन्ति।

नवदिनपर्यन्तं असौ उत्सवः महोत्सवनाम्ना प्रतिवर्षं वैभवेन प्रचलति। कार्तिकब्रह्मोत्सवनाम्ना प्रसिद्धोऽयं उत्सवः। निर्दिष्टरीत्या आलयालङ्करणं, वाहनसेवाः, वीथ्युत्सवाः, बलिहरणं नित्यहोमः ध्वजारोहणं देवताह्वनं, रथोत्सवः स्नपनम्, आस्थानसेवा, ढक्काढमरुकादिवाद्यश्रवणं, छत्रचामरादिभिः राजोपचाराः विशेषान्नप्रसादनिवेदनं, पुष्पालङ्करणं, विविधैः भक्तिमार्गैः सेवनं नीराजनोपचाराः फलादीनाम् अर्पणं च एतैः अंशैः सम्यगनुष्ठीयते।

भगवत्याः अनुग्रहसंपादनार्थं वेदमन्त्रैः विविधैः स्तोत्रैः दिव्यप्रबन्धैश्च अहमहमिकया अर्चक-पाचक-परिचारकभक्तजन-स्त्री-यजमानजनास्सर्वेऽपि स्वीयमनःहृदयं सर्वं च समर्प्य शरणागत्या सेवां कुर्वन्ति करिष्यन्ति च।

**वीथ्युत्सवाः क्रियाश्च -** पञ्चमीतीर्थदिनात् प्राक् अयमुत्सवः सम्यक्परिपालितः। ततः पूर्वस्मिन् दिने प्रातःकाले लक्षनामभिः कुङ्कुमार्चनं वैभवेन क्रियते। सायङ्काले मृत्सङ्ग्रहणपूर्वक, अङ्कुरार्पणकर्म पाञ्चरात्रभट्टाचार्याः सम्यगाचरन्ति।

प्रथमदिने प्रातःकाले उत्सवे सेवार्थं आलयदेवताबलिं दिक्पालकदेवताबलिं च समर्प्य सर्वदेवताह्वानार्थं तत्तद्देवतागद्यपद्यमन्त्रतन्त्र पूर्वकध्वजारोहणमाचरन्ति सुमुहर्ते।

सायङ्कालादारभ्य पद्मावतीदेव्याः वीथ्युत्सवानां परिभ्रमणं परिकल्पयन्ति। सायङ्काले शेषवाहने प्रातः हंसवाहने तृतीयदिने प्रातः चन्द्रसदृशकिरणसहिते मण्टपे सायं सिंहवाहने, चतुर्थदिने प्रातः कल्पवृक्षे सायं हनुमतः भुजस्कन्धयोः पञ्चमे डोलोत्सवे सायं विशिष्य गजवाहने षष्ठेऽस्मिन् दिने सर्वभूपालभूजाङ्कितवाहने मध्याह्ने स्वर्णरथे सायं गरुडवाहने सप्तमेऽस्मिन् दिने सूर्यवाहने सायं चन्द्रवाहने अष्टमदिने रथे सायं अश्वे च पद्मावतीदेव्याः उत्सवमूर्तिं संस्थाप्य समलङ्कृत्य पंगु - अन्ध - बधिर - मूक - स्त्री - जनसन्दर्शनार्थं वीथ्युत्सवाः राजोपचारैः यात्रोपचारैश्च सम्यगाचरन्ति यजमानजनाः।



नवमदिने पद्मसरसि विशेषतः स्नपनपूजां परिसमाप्य तीर्थजलमभिमन्त्र्य उत्सवमूर्तिं सुदर्शनचक्रेण सह त्रिवारं निमज्जनं कृत्वा स्नानं समाचरन्ति।

भक्ताः तस्मिन् समये तस्मिन्नेवजले स्नानं कृत्वा पद्मावतीदेव्याः सानुग्रहं सम्पाद्य पुनीताः भवन्तीति नैव सन्देहलेशः।

रात्रौ उत्सवपरिसमापनसूचनां विधातुं संघोषयितुं ध्वजावरोहणं करिष्यन्ति।

उत्सवे अस्मिन् अज्ञातदोषाणां प्रायश्चित्तपूर्वकपुष्पयागमहोत्सवः अपि वैभवेन अनुष्ठीयते षष्ठतितौ।

**उपसंहारः -** सर्वेऽपि भक्ताः आस्तिकाः धर्मज्ञाः शिष्टाः तिरुचानूरुक्षेत्रे पद्मसरः तीरे विराजमानायाः श्रीश्रीनिवासस्य दिव्यमहिष्याः पद्मावतीदेव्याः ब्रह्मोत्सवसमये तां देवीं आपादमस्तकं दृष्ट्वा चिन्तनं मननं ध्यानं कुर्वन्तस्सन् अनुग्रहं संपाद्य धन्याः भवन्तु इत्याशास्य विरमामि।

**नमः श्रियै लोकधात्र्यै ब्रह्ममात्रे नमो नमः।**



# तुलसीमाहात्म्यम्

- डा.पि.माधवी,
चरवाणी - ८५१९८०४७८४

(आगस्ट् सञ्चिका ७ पुटानन्तरं)

**माघपुराणोक्तिः -** क्षीरसागरमन्थनोद्भूतामृतकलशात् अमृतबिन्दुद्वयं अनवधानतया भूमौपतितम्। तत्र तुलसी पारिजातवृक्षौ प्रदुर्भूताविति एकादशीव्रतमाहत्म्ये प्रोक्तम्। वृक्षद्वयं सत्यजित् जलेन संवधर्मयामासेति अत एव श्री अमृततुलसी इति नामागतमिति प्रोक्तम्।

**बृहन्नरादीये तुलसीवृत्तान्तः -** कथेयं महेश्वर्या स्वसखीः उद्दिश्य प्रोक्तम्। "पुरा कैलासशिखरे" सद्ब्राह्मणः धर्मदेवः सदा विष्णुपारायणपरः आसीत्। अस्य भार्या बृन्दा सदा विष्णुपारायणपरा आसीत्। अस्य भार्या बृन्दापतिव्रता धर्ममाचरन्ती दैवपतिपूजानिमग्नासीत्। कदाचित् धर्मदेवः ऋषिमण्डल पर्यटने समाप्ते अतीतमध्याह्णकालः आसीत्। भार्या बृन्दा गृहागतातिथिपूजां दैवपूजां निर्वर्त्य कालातीतो भवतीति मनसा पतिंध्यात्वा जलपानञ्चकार। गानसभानन्तरं गृहमागतः पतिः धर्मदेवः स्वागमनत्पूर्वमेव जलपानं कृतेति क्रोधात् राक्षसी भवेति भार्यां शशाप। सा पतिशापात् राक्षसी भूत्वा क्षुन्निवारणार्थं जन्तुमनुष्यांश्च खादतिस्म। पूर्वजन्मज्ञानात् कैलासमाजगाम। कैलासे सर्वप्राणिनः शिवमयाः इति आहारमलभमाना कैलासे एव उपवासेन शरीरं तत्याज। शिवगणेन मृततच्छरीरस्पर्शात् कोटिखण्डाः प्रादुर्भूय विष्णुसहस्रनामपारायणं कुर्वन्ति स्म। शङ्करः दयाहृदयः "धर्मदेवपत्नी निर्दुष्टापिभर्तुशापात् राक्षसी जाता मृतेति अस्याः विष्णुभक्तिफलात् इयं बृन्दा भूलोके वृक्षरूपे प्रादुर्भूय विष्णुप्रिया भवत्विति तामनुगृह्य अस्याः मृतशरीरं भूमौ मृदाच्छदितं कुर्वन्त्विति स्वशिवगणमादिदेश। अस्याः नाम तुलसीति प्रसिदि्धर्भवत्विति तुलसीपत्रे द्वादशसारमन्त्रं वर्तते इत्युक्त्वा अन्तर्दधौ। उमामहेश्वरयोरपि तुलसी अधिष्ठानदेवता। तुलस्याः उपास्यदैवं श्रीमन्नारायणः। ततः बृन्दावियोगबाधितः धर्मदेवः पश्चात्तप्तः बृन्दावृत्तान्तं ज्ञात्वा शिवं प्रार्थयित्वा स्वं तुलसीमूलकर्तुमयाचत। शिवः तथास्त्विति आशीर्ददौ।

ततः कार्तिकमासे अमावास्यातिथौ प्रातःकाले तुलसी शिवविष्ण्वोः प्रीतिदायकतया भूमौ प्रदुर्बभूव। ततः विष्णुः शिवेन सहा भूलोकं गत्वा तुलसीमपश्यत्।

**महामेधप्रभां श्यामां स्कन्धपल्लवशोभितां।**
**दलैरसंख्यैः सम्पूर्णां महामन्त्रमयीं स्थितां।**
**ज्वलन्तीं स्वेन वपुषा गन्धामोदितदिङ्मुखाम्।।**

तदा तुलसी मङ्गलप्रदा महाविष्णुं संप्रार्थ्य एवं तुष्टाव-

**ओं नमो भगवते तुभ्यं नारायण जगत्पते**
**केवलानुभवानन्दस्वरूप परमेश्वर**
**कंसारये महेशाय केशवाय नमोऽस्तुते।**

ततः सा शिवमेवं तुष्टाव -

**ओङ्काराय नमस्तेऽस्तु शङ्कराय नमो नमः।**
**शिवाय हरये दक्षबलिक्रतुहराय ते।।** - इत्यादि।

ततः विष्णुः "यःकोऽपि तुलसीवृक्षप्रदक्षिणात् भूमण्डलप्रदक्षिणपुण्यफलं लभेदिति कार्तिकमासे मम तुलसीपत्रसमर्पणात् सहस्रगोदानपुण्यफलं लभेदिति च अवोचत्।

**त्वत्पत्रजलसिक्तान्ने भुक्ते मानवः क्वचित्**
**तदेवामृतमित्युक्तः भुक्तं भाग्यवता शुभे।**
**त्वत्पत्ररसभोजी च गङ्गाजलसमन्वितम्।**
**सोऽहमित्येव विज्ञेयं सत्यं सत्यं शपे शपे।।**

एवमक्त्वा हरिः तुलसीमभिषिच्य इन्द्रादिभिः वैकुण्ठं जगाम।

**तुलसीप्राशस्त्यम् -** प्रपञ्चे बहुषु देशेषु तुलसीवृक्षः सवर्ध्यते न केवलं भारते। मानवनित्यजीविते जननात्प्रभृतिमरणपर्यन्तं तुलसीप्रयोजनं दृश्यते। तुलसीरसः कफरोगनिवारकः। मरणशय्यायां अन्तिमदशास्थानां तुलसीरसतीर्थसेवनात् सुखं वैकुण्ठं प्राप्स्यन्तीति महतां वचनम्। तिरुमल वेङ्कटेश्वरालये भक्ताः तुलसीतीर्थं स्वीकृत्य कृतार्थाः भवन्ति। तुलसी तीर्थस्य कर्पूरयोजने द्विगुणीकृतं प्रयोजनं भवति। अतः सर्वत्र तिरुमलक्षेत्रे लभ्यमानः तुलसीकर्पूराण्यमूलिकामिश्रितश्रीपादरेणुप्रसादः बहुव्याधिनाशकः। श्री वेङ्कटेश्वरस्वामिनः षोडशोपचारपूजासु तुलसीतीर्थस्य प्रामुख्यं वर्तते।

**तुलसीकटुका तिक्ता हृद्युष्णादाहपित्तकृत्।**
**दीपनीकुष्ठकृच्छ्रस्रपार्श्वरुक्कफवातजित्।।**

तुलसीसम्बन्धश्रीपादतीर्थं अनिर्वर्ण्यमहिमान्वितम्। "इयं तुलसी - कटुतिक्तमनोहरा उष्णतापपित्तकारिणी अग्निदीपनकारिणी, कुष्ठुमूत्रकृच्छ्ररक्तदोषपार्श्व - पीडाकफवातहारिणी तुलसी।" तुलसी मिश्रित श्रीपादतीर्थ महत्त्वम् - **भगवत्पादतीर्थत्तु नित्यं यःपिबेन्नरः।**


**आरोग्यवान् सदा भूत्वा सायुज्यं लभते मम।।**
**सालग्रामशिलावारितुलसीदलसंयुतम्।**
**सर्वरोगादिशमनं सर्वपापहरं भवेत्।।**
**अकालमृत्युहरणं सर्वव्याधि निवारणम्।**
**सर्वपापक्षयकरं विष्णुपादोदकं शुभम्।।**

सर्वकृमिनाशक तुलसीवृक्षरहितहिन्दूगृहं एव भारतदेशे नास्तीति वक्तुं शक्यते।

# धन्वतरिजयन्ती

- डा.के.कोटेश्वरय्य,
चरवाणी - ९९८५१२३२६२

धन्वन्तरिः देववैद्यः विष्णोरवतरः इति महाचिकित्सकःइति वदन्ति। धन्वन्तरिजन्म अधिकृत्य ब्रह्व्यः कथास्सन्ति। समुद्रमन्थन समये अयमुत्पन्नः इति प्रथमकथाविषयः। चन्द्रः कामधेनुः, धन्वन्तरिः कालीमाता, लक्ष्मीदेवी क्षीरसागरादुत्पन्नाः इति धन्वन्तरिद्वारैव आयुर्वेदप्रादुर्भावः अभूदिति कथयन्ति। धनुः शल्यं, तस्य अन्तःपरं एति गच्छतीति धन्वन्तरिः। द्वितीयकथामनुसृत्य कश्चन ऋषिः कुशार्थं गतः दाहपीडितः अटव्यां वीरभद्रानामक वैश्ययुवतीद्वारा जलं पीत्वा सन्तुष्टः महाज्ञानबोधात् प्रपञ्चंज्ञानप्रकाशकारकः पुत्रः जनिष्यतीत्याशीः प्रयुयोज। अविवाहिता कुमारी सा वरलाभेऽपि कुमार्याः पुत्रः कथं जनिष्यतीति चिन्तामग्ना आसीत्। ऋषिः तां वीरभद्रां स्वाश्रमं नीत्वा तस्याः उत्सङ्गे तृणावळीं निक्षिप्य धन्वन्तरिमन्त्रं पपाठ। किञ्चित्कालानन्तरमेव तृणावली बालकरूपमवाप। स एव धन्वन्तरिः।समुद्रमन्थनकथा द्वारा विष्णुरेव आयुर्वेद वैद्यः बभूव। चाक्षुषमन्वन्तरागमनान्तरं औषधरत्नोत्पादनावश्यकता आगता। औषधरत्नं केवलमश्विनीकुमारसाध्यमासीत्। चाक्षुषमन्वन्तरकाले दुर्वासशापात् इन्द्रेण सह सर्वदेवाः लक्ष्मीहीनाः आसन्। दैत्येभ्यः देवताः भीताः पलायिताः। तदा सर्वेदेवाः सहायार्थं ब्रह्मणा सह च, शिवस्य विष्णोश्च सकाशं जग्मुः। विष्णुः दैत्यैः सन्धिं कृत्वा समुद्रमन्थनादमृतरूपोषधीन् उत्पादयत। अमृतपानात् बलवीर्यसम्पन्नाः भूत्वा मृताः पुनरुज्जीविताः भवेयुः। दैत्यैः सह गत्वा सम्पर्णोषधीनानीय क्षीरसागरे पातयत। तदा सारभूतामृतोत्पत्तिः लोकोपकारकवस्तूनि च बहिरागमिष्यन्तीत्युवाच। तदा देवाः राक्षसैः सम्मिलिताः अमृतार्थं नानाप्रकारोषधीन् आनीय क्षीरसागरे पातयामासुः। ततः सागरे औषधिमन्थनद्वारा मन्थनरसे अनुपातत्वेन स्वाशाः अपि मिश्रीकृताश्चक्रुः। तदा धन्वन्तरिः आविर्भूय ओषधिरसं अनुपातैः मिश्रीकृत्य अमृतरूपं प्रापयामास। तदा अमृतमयकलशः विष्णुनामजपेन सह आरोग्यप्रदोषधीनां नामोच्चारणशब्दोऽपि बहिरागतः। तदा धन्वन्तर्यपि दिव्यौषधीन् गृहीत्वा बहिराजगाम। दैत्याः अमृतप्राप्तये विष्णुं शरणमवापुः। विष्णुः मायाशक्त्या महासुन्दरीं सृष्ट्वा दैत्यान् मोहितान् कृत्वा अमृतं देवेभ्यः एव दत्वा वैकुण्ठं जगाम। ततः सूर्यनक्षत्रादयः स्वनियमितकर्माणि कुर्वन्तः प्रपञ्चं सुखमयं चक्रुः। ओषधिप्रयोगः अश्विनीकुमारहस्तागतः आसीत्। मानवलोके व्याधिग्रस्ताः दुःखीभूताः आसन्। तद्रक्षणार्थं विष्णुः धन्वन्तर्यवतारं



स्वीचकार। धन्वन्तरिरूपेण राज्ञः धन्वस्य अब्जधन्वन्तरिरूपपुत्रः बभूव। गर्भावस्थायामेव अष्टसिद्धीः अवाप। एवं विष्ण्वंशरूपधन्वन्तरिः एव आयुर्वेदमष्टाङ्गात्वेन विभागान् चकार। १. कायचिकित्सा २. बालचिकित्सा ३. ग्रहचिकित्सा ४..........५. ऊर्ध्वाङ्गचिकित्सा ६. शल्यचिकित्सा ७. दंष्ट्राचिकित्सा ८. जराचिकित्सा इति अष्टाङ्गनि ।

**परम्परास्थापनम् -** यदा ब्रह्मा प्रजापतये, शङ्करः शुक्राचार्याय। आयुर्वेदं बोधयामासतुः तथैव विष्णुः गरुत्मते आयुर्वेदविद्यां बोधयामास। ततः गरुत्मान् धन्वन्तरये आयुर्वेदं बोधयामास। एवं लोके विष्णुस्वरूप धन्वन्तरि द्वारा रोगनिवारणाय लोकाय आयुर्वेदौषधोपयोगसौकर्यमागतम्। धन्वन्तरेः विष्णुस्वरूपत्वात् शंखचतुर्भुजैः चक्रधारी औषधकलशधारी अमृतकलशधारी भवति। कमलवाहनोऽयम्। अस्य गुरुः गरुत्मान्। पीतवर्णप्रियः धन्वन्तरिः। अस्य वंशे जातः दिवोदासः काशीराजः शल्यचिकित्साविद्यालयं काश्यां निर्ममे। तत्र प्रधानाचार्यः सुश्रुतः। अयं दिवोदासशिष्यः विश्वामित्रस्य पुत्रः। सुश्रुतः आयुर्वेदसंहितां लिलेख। प्रपञ्चे प्रथमशल्यचिकित्सास्त्रष्टा सुश्रुतः एव। धन्वन्तरिमन्त्रजपोसना सर्वरोगनिवारणार्थं सर्वैः मानवैः कर्तव्या।

**धन्वन्तरिमन्त्रः -** ओं नमो भगवते धन्वन्तरये अमृतकलशहस्ताय, सर्वामयविनाशकाय, त्रिलोकनाथाय श्रीमहाविष्णवे नमः।। श्री श्री श्री अष्टचक्रनारायणाय नमः। धन्वन्तरिजयन्ती सन्दर्भे सम्पूर्णारोग्यार्थं प्रपञ्चमानवस्वास्त्यार्थं भगवन्तं धन्वन्तरिं नमस्कुर्मः।

धन्वर्यालयाः विरलाः एव। वारणासीसंस्कृतविश्व विद्यालयपुरावस्तुशालायाम्, तमिलनाडु श्रीरङ्गनाथस्य आलयातरङ्गे धन्वन्तरिमन्दरे नित्यापूजः प्रवर्तन्ते। केरलराष्ट्रे गुरुवायूरुसमीपे नेल्लुकायति ग्रामे एकः धन्वन्तर्यालयः वर्तते। आन्ध्रदेशे गोदावरीमण्डल स्थचिन्तलूरुग्रामे प्रसिद्ध धन्वन्तरिदेवालयः वर्तते।

१. नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मं।
लोके जरारुग्भयमृत्युनाशनं दातारमीशं विविधौषधानां।।
२.सम्पूर्णचन्द्रवदनं पुण्डरीकविलोचनं।
आजानुबाहुद्वितयं कृष्णमेघनिभालकं।।
३. कुन्दकुट्मलभादन्तं सर्वावयशोभितं।
शान्तं कृपाजलनिधि अक्रोधंशास्त्रपरमं।।
४. देवतारक्षकश्रेष्टं व्याधिमानविदारणं औषधग्राह्यनिपुणं भिषक्शास्त्रविशारदं।
सर्वज्ञं ज्ञानसम्पन्नं ध्यायेद्धन्वन्तरिं सदा।।



## श्रीनिवासस्य प्रियं शनिवारम्



१. ओंकारः शनिवारे प्रादुर्भूतः।

२. महालक्ष्मी श्रीनिवासवक्षःस्थलं शनिवारदिने एव प्राप्तवती।

3. श्रीकृष्णः यादवाय तिरुमलक्षेत्रे शनिवारे एव साक्षात्कृतः।

४. तोण्डमान् चक्रवर्तिनं आनन्दनिलय निर्माणं कुरु इति कथितदिनं शनिवारमेव। शनिवारे एव अनन्दनिलयानिर्माणं परिपूर्णं बभूव।

५. सुदर्शनचक्रं शनिवारे एव प्रादुर्बभूव।

६. शनिवारे एव श्रीनिवासः आनन्दनिलये प्रविष्टः।

७. श्रीनिवासस्य अलिमेलुमङ्गाम्बया कल्याणं शनिवारमेव।

(ओं नमो वेङ्कटेशाय)

सर्वे गुणाः काञ्चनमाश्रयन्ते।



**तिरुचानूरुपद्मावतीमातुः लक्षकुङ्कुमार्चनम्**

**25.11.2025**

तिरुमलतिरुपतिदेवस्थानानि

# 24.09.2025 आरभ्य 02.10.2025 पर्यन्तम् प्रवर्तित तिरुमल श्रीस्वामिसालकट्लब्रह्मोत्सवाहन दृश्यमालिका।





उभयदेवीभ्यः श्रीउग्रश्रीनिवासमूर्तिः

(उत्सवमूर्तिः तिरुमल)

कैशिकद्वादशी 02.11.2025

# याज्ञवल्क्यजयन्ती

- डा.चन्द्रशेखर्, चरवाणी - ९४९१७९४५०६

(गतसञ्चिका १७ पुटानन्तरं)



**याज्ञवल्क्यविवाहवृत्तान्तः -** याज्ञवल्क्यः कतुनामकऋषेः तनयां दिव्यलक्षणशोभितां कतुप्रार्थनया पर्यणैषीत्। मित्रनामक सद्ब्रह्मणस्य मैत्रेयीति ब्रह्मविद्यागोष्ठीषु परमासक्ता बन्धूनां अनुमत्या गार्गिनामकयोगीश्वरी सकाशे वेदान्तशिक्षामवाप्य याज्ञवल्क्यमेव पतिं प्राप्तुं स्वाभिलाषं गार्ग्या निवेदयामास। याज्ञवल्क्यः जनकराजसभायां अखण्डपण्डितानपि शास्त्रवादे पराजिताञ्चकार। अतः तमेवपरिणेष्यामीति पित्रापि प्रोक्तवती। पिता तस्याः अभिलाषं गार्ग्यै निवेदयित्वा तदर्थं गार्गी प्रयत्नशीलाञ्चकार। गार्गी मैत्रेयीं कात्यायनीसन्निधौ स्थातुं नियुयोज। कात्यायनी -मैत्रेय्योः गाढस्नेहानुबन्धप्राप्त्यनन्तरं मैत्रेय्याः अभिलाषं गार्गी कात्यायनीं विशदीचकार। मैत्राय्याः भक्तितत्परतया सन्तुष्टा स्वभर्तारं याज्ञवल्क्यं परिणेतुं मैत्रेय्याः अनुमति ददौ। पश्चात् याज्ञवल्क्येन मैत्रेय्याः विवाहः सर्वजनामोदकतया महोत्सवेन प्रवर्तितः। मैत्रेयी ब्रह्मविद्यागोष्ठीः निर्वहन्ती भर्तुः महानन्दं जनयति स्म। **याज्ञवल्क्यस्य योगीन्द्रपट्टाभिषेकः -** महर्षयः सर्वे योगीश्वरपट्टाभिषेकाय याज्ञवल्क्यादन्यः न कोप्यस्तीति निश्चित्य तत्सकाशं गत्वा तस्मात् परमयोगरहस्यानि ज्ञात्वा माघशुद्धपूर्णिमायां याज्ञवल्क्यं योगीन्द्रपट्टभिषिक्तं चक्रुः। याज्ञवल्क्येन ऋ षिभ्यः बोधितविषयाः एव योगयाज्ञवल्क्यनाम्ना द्वादशाध्यायैः विश्वविख्यातिं प्राप्ताः।

**याज्ञवल्क्येन तुरीयाश्रामस्वीकारः -** बहुषु समयेषु पण्डितसभासु याज्ञवल्क्यः समस्तवेदान्तविषयान् बोधयामास। अन्ते सन्यासाश्रमस्वीकरणसमये स्वभार्याद्वयममाहूय समस्तैश्वर्यं स्वधीनीकरिष्यामित्यवोचत्। ते धर्मपत्यौ मोक्षमार्गादन्यत् नेच्छावः इति तमेवोपदिशेति प्रार्थयामासतुः तदा याज्ञवल्क्यः ते उद्दिश्य - भर्ता भार्यायाः प्रियः भवति, केवलमात्मनः एव प्रियः न भवति। एवं न केवलं पुत्रमित्रादिभ्यः समस्तस्यापि आत्मप्रयोजनाय प्रियो भवति इति, अतः आत्मा द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, ध्यातव्यः इति तद्वारा समस्तं ज्ञातं भवेदिति अद्वितीयपरमात्मा एव सकलस्यापि कारणमिति, वेदशास्त्राणि परमात्मनः निश्शवासाः एव इति कथयन् पुनरेवमुवाच - आत्मा भूतेभ्यः उद्भूय तान्येवानुसृत्य मरणमेति। ज्ञानोदयात् पूर्वं विशेषज्ञानं प्राप्य मरणानन्तरं भेदविषयकसूचनया विना ब्रह्मात्माबभूव। अज्ञानात् आत्मनः देहेन्द्रियात्मकजीव भावः जातः। तदज्ञानं न नष्टमासीत्। विज्ञानधनस्वरूपस्य आत्मनः नाशो नास्ति। नेदं नेदमिति सर्वनिषेधेभ्यः निश्चितात्मनः आकारः एव नास्ति। अतः आत्मा अन्येन युक्तो न भवति दुःखबाधानाशरहितः आत्मा। अतः आत्मनैव आत्मा ज्ञातव्यः इदमेव अमृतत्वमिति बोधयित्वा भार्ये संसारसागरोत्तीर्णे विधाय स्वयं सन्न्यस्य नित्यानन्दभरितः बभूव।

**याज्ञवल्क्यस्मृतिः -** याज्ञवल्क्यः मिथिलानगरे ऋषिवर्गप्रार्थितः वर्णश्रमाचारधर्मप्रतिपादनसन्दर्भे आचारव्यवहार - प्रायश्चित्तनामक काण्डत्रयात्मक स्मृतिमुपदिदेश। प्रथकाण्डे चतुर्दश विद्याः, परिषत् संस्काराः सपिण्डविवाहाः, स्नातकविधयः, पुरोहितधर्मादयः विशदीकृताः। द्वितीयकाण्डे न्यायस्थानादिक - शिक्षाधिक- स्त्रीधन विषयकादयः चर्चिताः। तृतीयकाण्डे अपरकर्म अशौचशुद्धि, यतिधर्म मोक्षमार्ग-सत्त्वरजस्तोगुणदोषाः यमनियमप्रायश्चित्तादयः विशदीकृताः।

**योगयाज्ञवल्कचम् -** योगयाज्ञवल्क्ये योगयोगाङ्ग उपाङ्गदीनि द्वादशाध्याये प्रतिपादिताः। योगशाश्त्रमात्मना ब्रह्म सकाशादधिगतमिति प्रकटीचकार। गृहस्थोऽपि स्वकर्माण्याचरन् वेदान्तपरिज्ञानात् सम्मेलनोदयमुक्तिभक् भवेत्। केवलज्ञानात् मोक्षप्राप्तिर्भवेदिति कथनमविवेकः एव। स्वकर्मणामनुष्ठानात् सम्यगात्मनिदर्शनात् गृहस्थोऽपि विमुच्यते। ज्ञानकर्मसमायोगात् परमाप्नोति पूरुषः। पृथग्भावोन सिद्धये उभे तस्मात्तसमाश्रयेत्। भारतदेशे भक्ताः याज्ञवल्क्यजयन्तीं अक्टोबर् ३१ दिनाङ्के वैभवोपेततया निर्वहिष्यन्ति।

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६



(गतसञ्चिका ९ पुटानन्तरं)

# वेदान्तदेशिकः

कदाचित् शिल्पकारप्रार्थनया वेङ्कटनाथः स्वप्रतिमां अत्यद्भुतया निर्ममे। तां प्रतिमां, स्वनिर्मितपीठे स्थापयितुं प्रयत्नं कृत्वा विफलः जातः। प्रतिमायां लोपाः भवन्तीति मत्वा लोपनिवारणायन्तं चकार। प्रतिमायां शरीरान्तरङ्गभागात् रक्तस्रावः बभूव। पश्चात्तप्तः शिल्पकारः स्वपीठस्थापने लोपाः भवन्तीति ज्ञात्वा पीठे पुनः समीचोने कृते तदा प्रतिमा पीठेसम्यक् स्थिता आसीत्। पश्चात् वेदान्तदेशिकपुत्रः वरदाचार्यः प्रतिमामिमां शास्त्रोक्ततया तिरुवहीन्द्रपुरे स्थापयामास।

वेदान्तदेशिकः स्वयात्रायां मधुरैसमीपस्थ विल्लिपुत्तरुस्थ आण्डाल्मातारं सेवयामास। भक्तितत्परतया आत्मने गोदास्तुतिंसमर्पितं देशिकस्य दिव्यप्रबन्धमेकं स्वोत्सवेषु गातुं गोदामाता आदेशं ददौ। उत्तरभारतीययात्रायां नैमिशारण्यं सन्दर्श्य मङ्गलाशासनं चकार। गोकुले श्रीकृष्णं सन्दर्श्य तमस्तौषीत्। देवप्रयागे पवित्रस्नानमाचार्य बदरिकाश्रामे भगवन्तं प्रस्तूय, नेपाल् देशे सालग्रामाराधनां कृत्वा ततः द्वारकायां मधुरानाथं पूजयामास। एकस्मिन् सन्दर्भे अमायकपण्डितप्रेषितः सर्पप्रदर्शनजीवी कश्चित् स्वसकाशस्थ-विषसर्पान् वशीकर्तुमपृच्छत्। सर्वतन्त्रस्वतन्त्रबिरुदाङ्कितः देशिकः मौनस्थितः रक्षारेखामेकां भूमौ लिलेख। बद्धाः सर्पाः तां रेखामतिक्रम्य पुरतः नागताः। कश्चित्सर्पः रेखामतिक्रम्य विषं प्रसारयन् आगच्छन् देशिकगरुडमन्त्रावाहनात् गरुत्मान् तत्क्षणमागत्य विषसर्पं स्वमुखेन गृहीत्वा अदृश्यः बभूव। सर्पप्रदर्शनजीवी पश्चात्तप्तः स्वजीवनाय देशिकं क्षमस्वेति प्रार्थयित्वा देशिककृपया पुनः स्वपेटिकायां प्राप्तसर्वसर्पः यथेच्छं जगाम। कदाचित् यात्रासमये रात्रौ देशिकः, व्यापारिणः गृहप्राङ्गणे विश्रान्तः हयग्रीवस्वामिने नैवेद्यार्थं किमपि नलब्धमिति चिन्तया निद्रोपक्रान्तः बभूव। तद्वाहस्वामी, कश्चिदश्वः स्वधान्या-गारस्थधान्यं सर्वं खादतीति आक्रन्दनश्चकार। जागृतः देशिकः तमाश्वास्य किञ्चित् क्षीरमानयनाय व्यजिज्ञपत्। क्षीरे आनीते तत्क्षीरं देशिकः स्वाधीनस्थहयग्रीवस्वामिनः उपासनामूर्तेः निवेदनात् श्वेताश्वः अदृश्यः बभूव। आश्चर्यमग्नः व्यापरी धान्यागारद्वारोद्घाटनात् सुवर्णसञ्चिकाः अपश्यत्। परमानन्दभरितः व्यापारी कृतज्ञतया काश्चित्सुवर्णसञ्चिकाः देशिकाय समर्पयामासा। परन्तु देशिकः वेराग्यमूर्तिः ताः सञ्चिकाः नाहं धनार्थीति तिरश्चकार। कदाचित् देशिककीर्तिप्रतिष्ठावैराग्यानि दृष्ट्वा असूयाग्रस्ताः दुर्मार्गस्वाभाविनः तस्य पित्राब्दिकाय दुष्टबुद्ध्या ब्राह्मण-भोक्तॄन् आगमनाय अवरोधश्चक्रुः। पितृकार्यातङ्कारिणां तेषां भगवानेव युक्तां शिक्षां ददौ। यथाविधि कर्मकाण्डं निर्वर्त्य श्राद्धभोजनकार्यं सम्पन्नं कर्तुं आर्त्या भगवन्तं देशिकः प्रार्थयामास। कस्माचित् प्रान्तात् हयग्रीवस्वामी, वरदराजस्वामी, तिरुपतितः वेङ्कटेश्वरस्वामी वेषान्तरे आगत्य श्राद्धभोजनं भुक्त्वा पितृकार्यं सम्पन्नं चक्रुः। कदाचित् कुहनापण्डिताः देशिक-द्वारप्रदेशे प्राचीनशिथिलपादुकान् रज्जुभिः लम्बयामासुः। तत्पादुकातोरणं प्रातःकालागतदेशिकशिरसा स्पृष्टम्। एतत्कार्यात् देशिकानां सम्यक् अपमानं कृतमिति तुष्टाः दुर्मार्गपराः। विनयसम्पन्नः देशिकः तानू पादुकान् शिरसि धृत्वा



कृते च प्रति कर्तव्यम्।

भागवतपादुकाः मुक्तिमार्गं दर्शयिष्यन्तीति श्लोकमेवं पपाठ - ''कर्मावलम्बकाः केचित् ज्ञानावलम्बकाः वयन्तुहरिभक्तानां पादावलम्बकाः'' इत्यवोचत्। कदाचित् धनिकाः देशिकसरलत्ववैराग्यभावं दृष्ट्वा अस्मान् न किमप्ययं याचते इति अकिञ्चनब्राह्मणमेकमाहूय धनसाहाय्यार्थं तत्साकाशं गच्छेति उक्त्वा प्रेषयित्वा याच्ञाभङ्गात् तस्य देशिकस्य अवमानं स्यादिति मेनिरे। अहङ्काररहितः करुणामूर्तिः देशिकः तमकिञ्चन ब्राह्मणं रङ्गनायकीमातुः सन्निधिं नीत्वा तां तुष्टाव। रङ्गनायकी तथा स्तुत्या भावोद्वेगपरवशा प्रसन्ना कनकवर्षं वर्षापयामास। सः अकिञ्चनविप्रः देशिकस्य कृताज्ञतामाविश्चकर। देशिकः तं धनं न पस्पर्श। दुरहङ्करिणः झटित्यागत्य देशिकं क्षमाभिक्षां ययाचिरे।

क्री.शे.१३३३ वर्षे महम्मदीयः अल्लावुद्दीन् खिल्जीबूजीसैनिकाधिकारिणा दुर्बुद्ध्या मालिक्काफरुदुर्मार्गेण मतोन्मादेन बहुषु पुण्यक्षेत्रेषु विशृंखलतया ध्वंसिताः। महाचार्यसुदर्शनपुत्रौ द्वौ त्वरया श्रीभाष्यव्याख्यानं धावन्तौ श्रुतप्रकाशिकानाम्नीं स्वीकृत्य सुदर्शनसारिसूचनानुसारं बालकौ पवित्रग्रन्थौ च रक्षन्तौमृतशवराशिमध्ये निलीनौ आत्मरक्षां कुर्वन्तौ कर्णाटकसत्यकालमवापातुः।

सत्यकाले देशिकः प्रशान्ततया तपोध्यानविद्याबोधन ग्रन्थरचनाकार्यनिमग्नः आसीत्। स्वप्रियपुत्राय वरदाचार्याय, प्रियशिष्याय परकालजीयर्महोदयाय च श्रीभाष्यं बोधयामास। तत्र नित्यानुष्ठानार्थं नदीतीरे ज्ञानाश्वत्थवृक्षं प्राप्य तत्रैव ध्यानं करोति स्म।

**कूर्मासनम् -** कदाचित् करियकूर्मः भक्तसेवार्थं भागवतकैङ्कर्यं कर्तुं आह्निककार्यं प्रतिनिवर्तमानं वेगेन गच्छन्तं देशिकमनुधावतिस्म। पूर्वरात्रौ स्वप्ने तस्य मामपि कैङ्कर्यार्थमनुगृह्णन्तु इति प्रार्थयामास। देशिकः तस्मिन् कार्ये निरासक्तः आसीत्। रात्रौ भगवान् स्वप्नदर्शनं दत्वा देशिकमुद्दिश्य आर्तानुग्रहः करणीयः इत्यादिदेश। पश्चात् परश्वः उदये ज्ञानाश्वत्थवृक्षाधः कूर्मरूपे नीलशिलायां कूर्मासनं प्रत्यक्षमभूत्। देशिकः भगवदाज्ञेति तस्मिन्नासने उपविश्य कावेरीतीरे अनुष्ठानं करोतिस्म। अद्यापि तदृश्यं द्रष्टुं शक्यते।

देशिकाशानुसारं किञ्चिद्वर्षानन्तरं श्रीरङ्गात् तुरुष्काः पलायिताः। महादानन्देन देशिकः श्रीरङ्गनाथसन्निधिमाजगाम। तत्र साम्प्रदायवैष्णवाः आल्वारुदिव्यप्रबन्धान् श्रीरङ्गनाथालये गातुं तीव्रं व्यतिरेकं चक्रुः। आल्वरारुमहाशयेषु केचित् ब्राह्मणेतराः इति तदुपयुक्ता द्राविडभाषेति न संस्कृतमिति तिरुवायिमोलौ कामसम्बन्धपाशुराणि वर्तन्ते इति सम्प्रदायपराणां तीव्राभ्यन्तरः आसीत्। देशिकः दिव्यप्रबन्धाः वेदप्रमाण्ययुताः इति वेदनिक्षिप्ताः गूढार्थाः सर्वे तत्र वर्तन्ते इति सामान्यपरिभाषायां स्पष्टं वर्तन्ते इति तेषां कामभावना भक्तियोगपराकाष्टेति स्ववादं श्रावयित्वा साम्प्रदायिकान् अङ्गीकृतान् चकार। श्रीरङ्गे आल्वार् महाशयान् तत्प्रबन्धान् गौरवभावेन मानयित्वा सम्भावरूपकाध्ययनोत्सवस्य पुनः प्रतिष्ठाता वेदान्तदेशिकः एवेति घनसुप्रतिष्ठा देशिकस्यैव आगता।

**पादुकासहस्रम् : -** कदाचित् वैष्णवपण्डितः एकस्यां रात्रावेव पादरक्षाः अधिकृत्य सहस्रपद्यानि वक्तुं सामर्थ्यपरीक्षां ददौ। अर्चकाः शठारिं शिरसि निक्षिप्य दैवाज्ञेति काव्यरचनां कर्तुं प्रोत्साहयमासुः रात्रौ देशिकः भगवतः मणिपादुकवैभवं स्तुवन् पादुकासहस्रमिति अद्भुतकाव्यं प्रणिनाय। (वेगपठनेनापि पूरीकर्तुं घण्टाषट्कमावश्यकम्। महाभक्तः कवितार्किकविरुदाङ्कितः अयमिदमसाधरणकार्यञ्चकार। रङ्गनाथस्वामी देशिकं वेदान्तदेशिक बिरुदेन, रङ्गनायकी सर्वतन्त्रस्वतन्त्र गौरवनाम्ना सम्मानयामासतुः।

वेदान्तदेशिकः १०१ वर्षपर्यन्तं पुण्यप्रदजीवितं यापयित्वा अवसानदशां ज्ञात्वा रङ्गनाथ सन्दर्शनं कृत्वा लोकयात्रासमाप्तये अनुज्ञां प्रार्थयामास। तस्य एकैकपुत्रः वरदाचार्यः प्रियशिष्यः ब्रह्मतत्वज्ञः जीयरुमहाशयः अन्यशिष्यवर्गः अश्रुधाराविलिप्ताः आसन्। देशिकः तान् सान्त्वायित्वा रामानुजदर्शनप्रचार बाध्यातां निर्वर्तयितुमादिदेश। क्रि.श.१३६९ वर्षे देशिकः स्वशिरः पुत्रवरदायार्योत्सङ्गे निवेश्य पादौ ब्रह्मतन्त्रजीयरु सेवायां निक्षिप्य उपनिषदः तिरुवायूमोलिपाशुराणि च श्रुण्वन् देहं तत्याज।

देशिकगौरवार्थं रङ्गनायकीदेवी देशिकसन्निधिं गर्भालयपुरतः निवेशयन्तु इति आदिश्य स्वाप्रियभक्तदेशिकाय अखण्डगौरवं प्रसादितवती।





# सुब्रह्मण्यषष्ठी

- डा.यन्.गुणवती

चरवाणी - ८९१९६२०२२६

**26.11.2025** तिथिः सुब्रह्मण्यषष्ठीति स्कन्दषष्ठीति तिरुपति कपिलेश्वरस्वामिसन्निधौ स्कन्दषष्ठ्युत्सवं आर्चकाः वैभवोपेततया निर्वहन्ति। तिरुपतिकपिलेश्वरस्वामिदेवालये उत्सवमण्टपे विद्यमानः उत्सवमूर्तिः श्रीवल्लीदेवसेनासमेता श्रीकुमारस्वामी एव मूलमूर्तिरिव षण्मुखैर्विना, केवलं एकमुखेन विद्यमाना इयं मूर्तिः द्विपादोन्नाताभावति। अधःस्थ दक्षिणवाम हस्तौ वरमुद्राविशिष्टौस्तः। ऊध्वस्थ दक्षिणवामहस्तौ शक्ति शूलायुध धारिणौ स्तः। स्वामिनः दक्षिणभागे वामहस्ते कुवलयधारिणी वल्लीदेवी, वामपार्श्वे दक्षिणहस्ते कुवलय धारिणी देवसेनादेवी चित्ताकर्षकतया दृश्येते।

षन्मुखस्य सुब्रह्मण्यस्वामिनः मूलमूर्तिभिः सह उत्सवमूर्तिणामपि मासे मासे कृत्तिकानक्षत्रतिथौ षष्ठीतिथौ विशिष्य क्षीरदधिमध्वादिपञ्चामृतद्रव्यैः अभिषेकार्चननैवेद्यानि महोन्नतया समर्प्यन्ते।

वर्षे वर्षे मार्गशिरशुद्धषष्ठी स्कन्दषष्ठीति व्यवहरामः। अर्थात् सौरमानमनुसृत्य वृश्चिकमासशुद्धषष्ठयां प्रदोषकाले (सायंसन्ध्याकाले) षष्ठीतिथिसमये एव षण्मुखस्वमिमूलमूर्तिभिः सह उत्सवमूर्तीनां वैभवोपेततया अभिषेकार्चन, नैवेद्य समर्पणादीनि क्रियन्ते। तस्मिन्दिने सायंसमये मयूरवाहने वल्लीदेवसेनासहित सुब्रह्मण्यस्वामिनं तिरुपति पुरवीथीषु शिबिकायां नीत्वा परिभ्रामयन्ति।

वर्षे वर्षे धनुर्मासे कपिलतीर्थपुष्करिण्यां पञ्चदिनेषु प्रवर्तमानोत्सवे देवीभ्यां सहित कुमार स्वामिम्युत्सवमूर्तीनां द्वितीयदिने प्लवोत्सवः प्रवर्तते। दिने दिने वारत्रयं एतन्मूर्तिभ्य नैवेद्यादीनि, समर्प्यन्ते।

**सुब्रह्मण्यस्य जन्म -** कश्यपप्रजापतेः दनुतः वज्राङ्गः अजायत। वज्राङ्गेण स्वदानवत्वनिवारणाय ब्रह्माणमुद्दिश्य तपश्चरणानन्तरं गृहे भार्या अदृश्यतां गता। तदा सर्वाटवीषु परिबभ्राम। तदा एकस्य वृक्षस्याधः विलपन्ती सा भर्तरि ध्याननिमग्नेसति बाष्पाकुलितलोचना ''देवेन्द्रः बहुक्लेशजनकः आसीदितिकथनात्'' वज्राङ्गः वज्रसंकल्पः इन्द्रं शिक्षितुं तपश्चकार। तदा ब्रह्मा प्रत्यक्षीभूत्यः आसीत्। तदा सः इन्द्रादपि बलवान् पुत्रः मम प्रदेहीत्ययाचत। ब्रह्मा तस्य अभीष्टं वरं ददौ। वज्राङ्गिनी भार्या द्वादशमासानन्तरं तारकासुरं सुषुवे। जननादेव सः ब्राह्माणमुद्दिश्य तपश्चकार। प्रत्यक्षीभूतः ब्रह्मा त्वां सप्तदिनवयोबालकादन्यः न कोऽपि हनिष्यतीति वरं ददौ। जातः तारकासुरः लोकत्रयं विजित्य देवलोकान् भयभ्रान्तान् चकार। पार्वतीशापात् देवतानां सन्ततिरेव न स्यात्। एकदा पार्वतीपरमेश्वरौ कामकेली निमग्नौ सहस्रवर्षपर्यन्तं कालं सानन्दं यापयामसतुः। तदा लोकत्रयं भयादकम्पत। महान् भूकम्पः उदभूत्। देवाः शिवं रक्षणार्थं प्रार्थयामासुः। शिवः मम वीर्यधारकः कः इत्यपृच्छत्। ते भूदेवी तद्वीर्यं भरिष्यतीत्यवोचन्। ततः शिव-वीर्यं भूमावपतत्। एतच्चर्यायाः असन्तुष्टा पार्वती कोपात् मत्सङ्गमभग्नकारणात् देवानां सन्ततिर्नस्यादिति शशाप। शिववीर्यं भूमिपतितं सत् पर्वतान् वृक्षान् व्याप्तमासीत्। शिष्टं वीर्यं देवताभिः प्रार्थितः अग्निदेवः स्वीचकार। तद्वीर्यितापात् पर्वतोऽपि भस्मश्वेतपर्वतः समभूत्। तारकासुरः शिवाज्ञातसप्तवर्षबालकादेव मरिष्यति। तदा शिवः

सतीवियोगाद्दुखितः ध्याननिमग्नः आसीत्।देवताः शिवध्यानविघ्नार्थं कामदेवं प्रेषयामासुः। कामदेवः शिवस्य तृतीयनेत्राग्नितः भस्मीभूतः। ततः पार्वती, पित्रनुमत्या शिवमेव पतित्वेन प्राप्तुं तपः प्रारेभे। प्रत्यक्षीभूतः शिवः तां पर्यणैपीत्।



**सुब्रह्मण्यजननम् -** शिववीर्यधर्ता अग्निः ब्रह्मणः सकाशं गत्वा नाहं शिववीर्यं बिभर्मि किं कर्तव्यमित्यपृच्छत्। देवताः अपि ब्रह्माणमेव आपन्निवारणार्थमयाचन्त। ब्रह्मसकाशगमनसमये दृष्टां गङ्गां शिववीर्यभरणाय अग्निरचायत। तदर्थं गङ्गा अङ्गीचकार। बहुवर्षपर्यन्तं वीर्यभरणात् शरीरं नयने केशाश्च स्वर्णवर्णाः जाताः। गङ्गादेवी ५०० वर्षपर्यन्तं शिववीर्यं भरन्ती ततः भरणाय स्वाशक्ततां व्यक्तीचकार। तदा ब्रह्मा उदयपर्वते वीर्यं त्यक्तुं गङ्गायै अनुमतिं ददौ। वर्ष सहस्रानन्तरं तत्र पुत्रः जनिष्यतीत्यवोचत्। तथाचरणात् १००० वर्षानन्तरं तत्र पर्वते वृक्षाः सुवर्णमयाः परिणताः। तत्रैव शिशुरपि जातः। सः एव सुब्रह्मण्यस्वामी। आकशे विहरन्त्यः कृत्तिकारूपाः षट्देवताः शिशुं दृष्ट्वा स्तन्यं दत्वा पोषयामासुः। अतः बालः षण्मुखोभूत्वा कार्तिकेयः इत्याहूतः।ब्रह्मा अग्नेः इमां वार्तां श्रावयामास। बालं द्रष्टुमागच्छन् अग्निः गङ्गादेव्यै अपि विषयं विज्ञापयामास। अग्निः गङ्गा च बालकः कस्य पुत्रः इति विवादे निर्णयार्थं विष्णुसकाशं जग्मतुः। तदा पार्वती परमेश्वरावपि विष्णुसकाशमाजग्मतुः। पुत्रविषये अग्निगङ्गायोः समाधानतया आदौ बालं यः पश्येत् स एव पितृजनकस्थानीयः इत्यवोचत्। तदा बालकः चतुर्मुखैः कुमार, विशाख, शाख, नागमेयनामकैः चतुराननैः दृष्टः। तदा शिवः गङ्गाकुमारः कुमारस्वामीति, पार्वतीपुत्रः स्कन्दः इति मम पुत्र गुह्यः इति, अग्निपुत्रत्वेन महासेनः, इति कृत्तिकाभिः पोषितत्वात् कार्तिकेयः इति अटव्यां ''शरवणे'' जातत्वात् शरवणः इति प्रण्मुखैः जातत्वात् षण्मुखः इति प्रसिद्धिं प्राप्स्यतीत्यवोचत्। एवं कथनानन्तरं शिवः देवताः सस्मार। विष्णुब्रह्मादिदेवताः तत्र आगत्य शिवमुद्दिश्य देवताभीष्टसिद्ध्यर्थं अग्निद्वारा सुब्रह्मण्य जन्म सम्भूतम्। एनं सर्वं सेनानायकं कृत्वा असुरैः युद्धाय सन्नद्धाः भवन्तु इत्यवोचत्। ततः सर्वेदेवाः त्रिमूर्तयश्च कुरुक्षेत्रमानीय बालं सर्वसेनानायकं चक्रुः। शिवविष्णुदेवाः स्वसैन्यं सुब्रह्मण्याय बहुमतिरूपेण ददुः। देवासुरसंग्रामे तारकासुरः तस्य पुत्राः माहिषः, शूरपद्मासुरः बाणासुरादयः कुमारस्वामिना हताः। भीतेन देवेन्द्रेण प्रयुक्तवज्रायुधात् सुब्रह्मण्यस्य दक्षिणपार्श्वात् विशाखः, कन्याकुमारगणाश्च जाताः। तदा इन्द्रः सुब्रह्मण्य स्वामिसामर्थ्यं दृष्ट्वा आश्चर्यचकितः स्वतनयां देवसेनां तस्मै दत्वा वैभोपेततया विवाहञ्चकार। (स्कान्द पुराणानुसृत्य) सुब्रह्मण्यस्वामिव्रताचरणम्।

**सुब्रह्मण्यस्वामिव्रताचरणं -** सुब्रह्मण्यस्वामिचरित पठनं, श्रवणं महापुण्यप्रदं नागकुजदोषनिवारकं, शत्रुविजयप्रदं, दृष्टिदोषनिवारकं इहपरसुखप्रदं अविवाहितेभ्यः शीघ्रविवाहकारकं भवति। प्रत्यहं प्रातरुत्थाय स्नानान्तरं शुचिर्भूत्वा स्वामिनं पुष्पैर्वा तुलसीदलैर्वा अक्षतैर्वा भक्ति-श्राद्धाभ्यां सम्पूज्य कदलीगुडक्षीर पञ्चामृतादिभिः नैवेद्यं समर्पितश्चेत्-अभीष्टसिद्धिः आयुररोग्य पुत्रपौत्राभि वृद्धिः स्यात्। तमिलनाडुराष्ट्रे बहूनां कुलदैवतम् सुब्रह्मण्यस्वामी। ज्ञानप्रदाता स्वामी बह्वालयेषु नित्यपूजाः गृह्णाति।

**श्रीकाशोद्भासिताङ्गं शरवणविभवं योगमूर्तिं कुमरं ओंकारोद्भासितास्यं भुजङ्गफालनिभं षड्जमूलाधिरुढं।**
**पद्मीमध्ये सुषम्नागततनुरुचिरंप्रापकं तच्छिवाङ्कं श्रीसुब्रह्मण्यदेवं विनमितशिरसा शाङ्करीसूनुमीडे।।**

तेलुगु मूलम् - डा.श्रीनिवासदीक्षितुलु
चित्राणि - श्री के. द्वारकानाथः

# गुरुदैवभक्तिमहिमा


संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

काञ्चीपुरसमीपे तूपुल् नामकग्रामः आसीत्। तत्र वैष्णवाचार्यः वेदान्तदेशिकः निवसति स्म। कदाचित् तस्य गृहं काञ्चीनगरात् एकः ब्रह्मचारी आजगाम।





नास्ति पुत्रसमः प्रियः।




नीतिः - उत्तमाचार्यः दैवशक्त्या शिष्यदारिद्र्यं निवारायति। भगवतीं, भगवन्तं वा भक्त्या वा तोषयति।उत्तम शिष्योऽपि धनाशया विना जीवनपर्याप्तमेव धनं स्वीकरोति।

# द्वादशराशीनां नवम्बर् मासफलानि 2025

आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७



**१.मेषराशिः -** आध्यात्मिककार्येषु उत्साहः, पराक्रमः, अधिकधनव्ययः, स्त्रीभोगः, प्रधाणलाभः, शत्रुजयः, वाहनयोगः, तदा तदा ज्वरपीडा, सोदरद्वारादुःखं सम्भवन्ति। श्रीमहाविष्णोः पूजा कर्तव्या।

**२.वृषभराशिः -** सोदरलाभः, आध्यात्मिकचिन्तनं, तीर्थयात्राभिलाषः, उत्साहः, धैर्यं, कार्यजयः, कुटुम्बाभिवृद्धिः, सर्वत्रलाभः, अधिकारजनप्रशंसाः, उद्योगपरिवर्तनं रक्तदर्शनं च सम्भवन्ति। लक्ष्मीपूजा कर्तव्या।

**३. मिथुनराशिः -** देशभ्रंशः, वाक्पारुष्यं, मनोल्लासः, वाहनयोगः, दुस्स्वप्नः, मनोदुःखं, व्यापारजयः, आध्यात्मिक चिन्तनं योगाभ्यासदीक्षा, पितृचिन्ता, सम्भवन्ति। शिवाराधनं करणीयम्।

**४.कर्काटकराशि : -** तीर्थयात्राभिलाषः, दैवचिन्तनं, आलयदर्शनं, वाहनयोगः, विदेशगमनचिन्तनं, वृथाविवादाः मनोदुःखं, भाग्यलाभः, धनादायः, उद्वेगः, अधिकारजनपीडा सम्भवन्ति। लक्ष्मीपूजा कर्तव्या।

**५. सिंहराशिः -** सद्व्ययः शुभकार्येषु निमग्नत्वं, पराक्रमः, सोदरचिन्तनं, देशान्तरगमनं, कुटुम्बे वृथा विवादाः, व्यापारलाभः, मैत्रीसंवादः सम्भविष्यन्ति। श्रीमहाविष्णोः पूजा कर्तव्या।

**६. कन्याराशिः -** मनसोल्लासः, सन्तानलाभः, कुटुम्बवृद्धिः, कार्येषुलाभः, कार्यविजयः कलत्रद्वाराभाग्यलाभः, तीर्थयात्राभिलाषः, दैवचिन्तनं, आध्यात्मिक जीवनप्रस्थानं च फलानि सम्भवन्ति। शनिग्रहपूजा कर्तव्या।

**७. तुलाराशिः -** अद्यतनोद्योगपरिवर्तनं, वाक्पारुष्यं, चिन्तनं दुस्स्वप्नः, ग्रन्थपठनं, शरीरस्यास्वास्थ्यम् धनव्ययः सम्भवेयुः। तथापि अधिकारजनद्वाराप्रशंसार्हाः आनन्दः आत्मनःभीतिः, कीर्तिः विजयः सम्भवन्ति। शिवपूजा कर्तव्या।

**८. वृश्चिकराशिः -** धनलाभः, पितृलाभः, आध्यात्मिकोन्नतिः, सत्कार्याचरणं, तीर्थयात्रा, अकालभोजनं, शरीरक्लेशः, सद्व्ययः, आत्मनःबाधा, अधिकारजनबाधा, व्यापारनष्टं, सम्भवन्ति। सूर्यग्रहाराधनं कर्तव्यम्।

**९. धनूराशिः -** अधिकधनव्ययः, सोदरचिन्तनम्, अपयशः, आत्मलाभः, सद्व्ययः ध्यानजपचिन्तनं, तृप्तिः, सन्तानबाधा, मातृचिन्ता, देशभ्रमणं, सम्भविष्यन्ति। गुरुग्रहाराधनं करणीयम्।

**१०. मकरराशिः -** सन्तानाभिवृद्धिः, भार्याविरोधः, देशसञ्चारः, अधिकार जनबाधा, व्ययः, वाक्पारुष्यम्, यशः, दुस्स्वप्नाः, तीर्थयात्रा, नदीस्नानं, सम्माननं, आत्मोन्नतिः सम्भविष्यन्ति। शिवाराधनं करणीयम्।

**११. कुम्भराशिः -** देशभ्रमणं, व्ययः, वाक्पारुष्यम्, वृथाचिन्तनं, मनोदुःखं, धनादायः, पितृचिन्ता, व्यापारनष्टं, अपयशः, सम्भवेयुः। तथापि शरीरस्य उत्साहः, कर्मानुष्ठाने विचारः भविष्यन्ति। श्रीमहाविष्णोः आराधनं करणीयम्।

**१२. मीनराशिः -** आरोग्यचिन्तनं दुस्स्वप्नाः शत्रुबाधा, ज्वरपीडा, पितृचिन्तनं, अधिकधनव्ययः, मनोदुःखं सम्भविष्यन्ति। तथापि आध्यात्मिकचिन्तनेन तृप्तिः संभविष्यति। नवग्रहाराधनं करणीयम्।



एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत्।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



2025 सेप्टम्बर् 25 तिथौ तिरुमलक्षेत्रे भक्तेभ्य नूतनवसति समुदयं वेङ्कटाद्री निलये (पि.ए.सि) भारत उपराष्ट्रपति गौरवनीय श्री सि.पि.राधाकृष्णन् महोदयेन सह प्रारम्भ कुर्वन्तः आन्ध्रप्रदेशमुख्यमन्त्रिवर्याः, मान्यश्री नाराचन्द्रबाबुनायुडु महोदयाः।



2025 सेप्टम्बर् 2025 तिरुमल वैकुण्ठं क्यूकाप्लेकस् स्थले ऐ.सि.सि., केन्द्रं प्रारम्भं कुर्वन्तः आन्ध्रप्रदेश मुख्यमन्त्रिवर्याः मान्यश्री नाराचन्द्रबाबुनायुडु महोदयाः।



2025 सेप्टम्बर् 24 तिथौ तिरुमल श्रीपते रू.3.86 कोटिमूल्यपरिमित स्वर्ण यज्ञोपवीतं तिरुमल तिरुपति देवस्थान धर्म कर्तुमण्डल्यध्यक्षाः बि.आर्.नायडु महोदयाः सभ्याः श्रीमति वनबाकलक्ष्मी, श्रीशान्तराम महोदयाः दातृभ्यां पुव्वाडमस्तानरावु, श्रीमतिकुङ्कुमरेखादम्पत्या स्वीकरण दृश्यम्।



2025 सेप्टम्बर् 18 तिथौ मातृश्री तरिगोण्डवेंगमाम्बायाः अन्नप्रसादकेन्द्रे तिरुमलतिरुपतिदेवस्थान कार्यनिर्वहणाधिकारि सिंघाल ऐ.ए.यस्., महोदयैः पर्यवेक्षणपरीक्षाः भक्तैः निर्वहन्तः भाषमाणदृश्यम्।



2025 सेप्टम्बर् 13 तिथौ तिरुमल तिरुपति देवस्थान धर्मकर्तुमण्डली यक्स् अफिसियो सभ्यत्वेन प्रमाणमाचरतः देवादाय शाखकार्यदर्शिभ्यः श्रीहरिजवहर्लाल् ऐ.ए.यस्., महोदयेभ्यः तिरुमलतिरुपतिदेवस्थानानुबन्धकार्य निर्वहणाधिकारि श्री सि.हेच्.वेङ्कय्य चौदरी ऐ.आर्.यस्., महोदयैः चित्रपटसमर्पण दृश्यम्।



2025 सेप्टम्बर् 13 तिथौ तिरुमलतिरुपतिदेवस्थान धर्मकर्तुमण्डली सभ्यत्वेन प्रमाणं कुर्वतः श्रीसुदर्शनवेणुमहोदयेभ्यः तिरुमलतिरुपतिदेवस्थानानुबन्धकार्य निर्वहणाधिकारिणा श्रीवेङ्कय्यचौदरी ऐ.आर्.यस्., महोदयेन श्रीवारिचित्रपट समर्पण दृश्यम्।



SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-10-2025 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal Regd. No. TRP/154/2024-2026“ LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026” Posting on 1st of every month.

तिरुचानूरुपद्मावतीमातुः पुष्पयागः

(26.11.2025)